# Shambhavakrita Shiva Stuti

# શામ્ભવકૃતા શિવસ્તુતિઃ

## Document Information

Text title : Shambhavakrita Shiva Stuti

File name : shivastutiHshAmbhavakRRitA.itx

Category : shiva, stuti, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 25| 32-70 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# શામ્ભવકૃતા શિવસ્તુતિઃ

નમો નમસ્તેઽસ્તુ નમો નમસ્તે નમો નમસ્તે ગિરિજાસહાય ।
મૃત્યુઞ્જયાનામય મામવાવ ગતિસ્ત્વમેવાસિ મમેન્દુમૌલે ॥ ૧॥

ત્વં કાલકૂટાદિવિષોદ્ભવાનિ દુઃખાનિ સર્વાણિ સુરાસુરાણામ્ ।
દૂરીકરોષિ ત્રિજગજ્જનિત્રી ગૌરી તવાર્ધાઙ્ગમનઙ્ગશત્રો ॥ ૨॥

યો મઙ્ગલામઙ્ગલસૂત્રસઙ્ગઃ સ શઙ્ગ ભઙ્ગાય કદાપિ નાસીત્ ।
સ તાવદાશુ સ્મૃત એવ શમ્ભો શુભાનિ સૂતે સુતરાં તતાનિ ॥ ૩॥

સન્તાનસઙ્ઘાતમમૂહવૃદ્ધિઃ સમૃદ્ધિરીશાન પદે સ્મૃતે મે ।
સમ્ભાવિતા તાત વિમુક્તિરન્તે નિરન્તરાયાસુરવૃન્દવન્દ્ય ॥ ૪॥

યત્તે મહાદેવપદારવિન્દમાનન્દધારામ્બુદસુન્દરં મે ।
આનન્દમત્યદ્ભુતમાતનોતિ સન્દર્શનાદેવ પિનાકપાણિઃ ॥ ૫॥

કલ્યાણરાશિઃ સમુદેતિ વૃદ્ધિં નષ્ટો મહાપાતકપર્વતોઽપિ ।
આનન્દગઙ્ગાવિતરઙ્ગભઙ્ગસઙ્ગેન સિક્તં કુરુતે મનો મે ॥ ૬॥

અપારપુણ્યાનિ ફલોન્મુખાનિ તપાંસિ દાનાન્યમિતાનિ તાનિ ।
આનન્દગઙ્ગા વવૃધે સમૃદ્ધા મતેઃ પ્રવૃદ્ધા મમ ચન્દ્રમૌલે ॥ ૭॥

ત્વત્પાદપદ્મસ્મરણેન્દુધારાપ્યાનન્દધારા તનુતે વિચિત્રા ।
ત્રિનેત્ર તત્પાત્રમહં પવિત્રં ત્વન્નેત્રસંસર્ગવિધૂતતન્ત્રમ્ ॥ ૮॥

યત્પાદસેવાનિરતાઃ કૃતાર્થાઃ સુરેન્દ્રલોકાદિપદાર્થમાત્રે ।
વાઞ્છાં ન કુર્વન્તિ સુમેરુહસ્તાઃ હસ્તેન કિં વા યવસં વિધત્તે ॥ ૯॥

ત્વત્સેવયા કેવલમિન્દુમૌલે લક્ષ્મીઃ પુરો ધાવતિ વન્દિરૂપા ।
વાણી ચ વાણીરમણં વિહાય ઉમાસહાય સ્મરણાનુરાગા ॥ ૧૦॥

યાગૈર્ન યોગૈરપિ સાગરાન્તમહીપ્રદાનૈરપિ ગોપ્રદાનૈઃ ।
સુખાન્યપારાણિ ન ચન્દ્રમૌલે ત્વત્પાદુકારાધનહેતુકાભિઃ ॥ ૧૧॥

અપારસંસારમહામ્બુરાશિવિશોષણાય સ્મરણં તવૈવ ।
મહાગ્નિકલ્પાન્યતિપાતકાનિ ધારા ધરત્યેતદુમાસહાય ॥ ૧૨॥

મમ ત્વદીયશ્ચરણઃ પ્રભૂતમૈશ્વર્યમાકલ્પમનન્યલભ્યમ્ ।
સમ્પાદયત્યેવ વિમુક્તિમન્તે કિમન્યદત્રાપિ વરાય યોગ્યમ્ ॥ ૧૩॥

યસ્માદિહામુત્ર સુખપ્રવાહાઃ ત્વત્પાદપદ્માનુવિલોકનેન ।
અતઃ કિમન્યદ્વરણીયમદ્ય યદ્યસ્તિ તન્મે વદ સાવધાનમ્ ॥ ૧૪॥

સ્વર્ગાપવર્ગપ્રદમિત્યવૈમિ નિધાનદાનક્ષમમિત્યવૈમિ ।
ત્વત્પાદુકાધ્યાનમતો મહેશ કિં દેયમપ્યસ્તિ જગત્ત્રયેઽપિ ॥ ૧૫॥

અતઃ પરં કેવલમિન્દુમૌલે ત્વત્પાદપદ્મસ્મરણાનુરક્તિઃ ।
વિરક્તિરપ્યબ્જજલોકવાસેઽપ્યસ્તુ સ્મરારે સ્મર મામનાથમ્ ॥ ૧૬॥

અનાથનાથસ્ત્વમુમાસહાય મામપ્યનાથં શરણં ગતં ભો ।
પ્રપન્નમન્દાર હરામરેશ ત્વયા સનાથં કુરુ મામનાથમ્ ॥ ૧૭॥

યત્તે પદામ્ભોરુહમબ્જજાદિમનઃસરોજાસનસન્નિવિષ્ટમ્ ।
તત્કષ્ટનાશાય સમર્થમેવ સ્મૃતં કદાચિન્મરણક્ષણે વા ॥ ૧૮॥

અર્ધેન્દુમૌલે મરણક્ષણે મે વિભૂતિરુદ્રાક્ષવિભૂષણસ્ય ।
ત્વત્પાદપદ્મસ્મરણાનુરાગો ભવત્વયં તાત તવ પ્રસાદઃ ॥ ૧૯॥

તાતસ્ત્વમેવાસિ મમેન્દુમૌલે માતા ભવાની યુવયોઃ પ્રસાદાત્ ।
મહેશ્વરારાધકસન્તતિર્મે સદા પ્રવૃદ્ધાઽસ્તુ વરોઽયમેકઃ ॥ ૨૦॥

મત્સન્તતિઃ શઙ્કરપૂજનેન દિને દિને વૃદ્ધિમુપેત્ય નિત્યમ્ ।
કરોતુ ગૌરીરમણાઙ્ઘ્રિપૂજાં પ્રજાધનપ્રાણનહેતુભૂતામ્ ॥ ૨૧॥

લોકે મહેશાર્ચકપાદુકાર્ચા ધનાર્જનાસક્તધિયો મહાન્તઃ ।
સુખાનિ ભુક્ત્વા સુકૃતૈરુદારૈઃ દારૈઃ કુમારૈરપિ ભાગ્યવન્તઃ ॥ ૨૨॥

અનન્તકલ્યાણપરમ્પરાણાં નિદાનમીશસ્મરણં વરેણ્યમ્ ।
તદેવ તાવન્મમ સર્વદાઽસ્તુ મત્પ્રાર્થનીયં ચ તદેવ શમ્ભો ॥ ૨૩॥

શમ્ભો ભવાનીરમણ પ્રભો માં ત્વદ્દાસદાસાદિપરમ્પરાયામ્ ।
વિલોક્ય વા પાહિ કૃપાનિધાન ગતિસ્ત્વમેવાસિ મમેન્દુમૌલે ॥ ૨૪॥

ત્વમેવ માતાઽસિ જગજ્જનિત્રી પ્રિયે મહેશસ્ય પિતા ત્વમેવ ।
મહેશ તસ્માદવ દીનબન્ધો દયારસાર્દ્રાક્ષિતટપ્રસાદૈઃ ॥ ૨૫॥

અપારપાપપ્રલયાનલસ્ત્વં ત્વત્પાદપદ્મસ્મરણં ક્ષણં વા ।
અક્ષીણપુણ્યાભરણેન લભ્યઃ ત્વમીશ તે પાદમનુસ્મરામિ ॥ ૨૬॥

શ્રીકાલકાલહૃદયે કલયામિ નિત્યં ત્વાં કાલકાલમહિલે કલયેઽનુવેલમ્ ।
મચ્ચિત્તમસ્તુ યુવયોશ્ચરણારવિન્દે વન્દે મુહુર્મુહુરહં વિજહામિ શોકમ્ ॥ ૨૭॥

હે ભૂતનાથ ભગવન્ ગિરિજાસહાય હે ગૌરિ દેવિ ગિરિજે શિવવલ્લભે મામ્ ।
પાહિ સ્મરાન્તક યમાન્તક ચન્દ્રમૌલે પાહિ સ્મૃતાઽપિ મધુકૈટભહન્ત્રિ ધાત્રિ ॥ ૨૮॥

પાહિ પ્રભો ભવભયાપહ મોહશત્રો પાહિ ત્રિલોચન સુરાસુરસાર્વભૌમ ।
પાહિ પ્રબોધજનનિ પ્રલયાવસાન શ્રીભલલોચન વિહારવિનોદલીલે ॥ ૨૯॥

પાહિ પ્રપન્નસુરલોકવિલોકનેન કૃત્વા સુરારિવિલયં કરુણાનિધાને ।
પાહિ સ્મરારિકરચારુવિચારિતાઙ્ગિ શ્રીમઙ્ગલે સકલમઙ્ગલદાનલોલે ॥ ૩૦॥

પાહિ પ્રસીદ શિવભક્તમનન્યધન્ય માન્યં મદન્યમપિ ધન્યમનન્યચિત્તમ્ ।
પાહિ પ્રસાદસુમુખૈઃ કરુણાકટાક્ષૈઃ દાક્ષાયણિ પ્રણતપાપવિનાશદક્ષે ॥ ૩૧॥

પાહિ ત્વમેવ ગતિરિત્યનુવારમીશ ત્વત્પાદપદ્મભજને કરવાણિ વાણીઃ ।
સૈષા મમ સ્ફુરતુ પાહિ શિવે ભવાનિ ત્વત્પાદપદ્મભજને રતિરસ્તુ નિત્યમ્ ॥ ૩૨॥

પાહિ સ્મરામિ હર તે ચરણારવિન્દં મન્દારકુન્દનવબિલ્વદલાદિપૂજ્યમ્ ।
પાહિ સ્મરામિ ગિરિરાજસુતે ત્વદીય પાદામ્બુજં ત્રિદશચિત્તકલત્રપાત્રમ્ ॥ ૩૩॥

વન્દે સર્વસુરાસુરપ્રભુમુમાકાન્તં પ્રશાન્તં મુહુઃ
    સન્તાનદ્રુમપુણ્યમણ્ટપમહાસિંહાસનાધિષ્ઠિતમ્ ।
આનમ્રામરવૃન્દમૌલિવિલસત્કોટીરદિવ્યપ્રભા-
    પુઞ્જવ્યઞ્જિતપાદુકે તવ ભજે મૃત્યુઞ્જયાવાવ મામ્ ॥ ૩૪॥

ત્વામારાધ્યતમં વદન્તિ મુનયઃ સોમાવતંસં પ્રભું
    વેદાન્તા અપિ સંસ્તુવન્તિ ભગવંસ્ત્વત્પાદપદ્મં મુહુઃ ।
ત્વદ્રૂપં વિદિતં ન યોગિનિકરૈઃ યાગૈશ્ચ દાનૈસ્તથા
    દીનાનામવનૈશ્ચ નિશ્ચિતમિદં સર્વાત્મના શઙ્કર ॥ ૩૫॥

શર્વાણીકુચહેમકુમ્ભવિલસત્કાશ્મીરરેણુપૂરા-
    પૂરિતદિવ્યકાન્તિરુચિરત્વત્પાદપદ્મં મુદા ।
વન્દે સુન્દરમ દ્રિજાકર તલાલઙ્કારસારાકરં
    વારં વારમનુસ્મરામિ સકલાભીષ્ટપ્રદાનાકરમ્ ॥ ૩૬॥

કારુણ્યામૃતસાગરામરવરાપારાનતિવ્યત્યય-
    વ્યત્યસ્તોન્નતપાદકામિતમણિશ્રીરઞ્જિતં માં કુરુ ।
ત્વામેવાહમુપાગતઃ શરણમિત્યર્ધેન્દુમૌલે સ્મર
    સ્મર્તવ્યેષ્વહમેક એવ ભગવન્ કિં નાવશિષ્ટઃ પ્રભો ॥ ૩૭॥

કલ્યાણાનિ તનોતિ મે તવ પદામ્ભોજં વિપત્સન્તતિં
    દૂરીકૃત્ય મહાઘસાગરમહાકલ્લોલમાલા અપિ ।
લીલા તે ખલુ કાલકાલ જગતાં સૃષ્ટિસ્થિતિધ્વંસના-
    ન્યાયાસોઽપિ ન તત્ર તૈલતતમપ્યેતત્તવ ક્રીડનમ્ ॥ ૩૮॥

મામા મુઞ્ચ મહેશ મામકધિયા મદ્ભાગધેયં પ્રિયં
    શમ્ભો ત્વચ્ચરણારવિન્દભજનં તન્મે નિધિઃ તદ્ધનમ્ ।
તન્મે સૌખ્યમહામ્બુધિશ્ચ તરણોપાયોપ્યપાયામ્બુધેઃ
    આનન્દામ્બુધિવીચિકાદિરચના ચાતુર્યમર્યાદભૂઃ ॥ ૩૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શામ્ભવકૃતા શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૨૫। ૩૨-૭૦ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 25. 32-70 ..

Proofread by Ruma Dewan

*Shambhavakrita Shiva Stuti*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*